# Sharabhasahasranamastotram 2

# શ્રીશરભસહસ્રનામસ્તોત્રમ્ ૨

## Document Information

Text title : sharabheshvarasahasranAmastotram 2

File name : sharabhasahasranAmastotra.itx

Category : sahasranAma, shiva

Location : doc_shiva

Author : harihara

Transliterated by : DPD

Proofread by : DPD, Pallasena Narayanaswami ppnswami at gmail.com

Description-comments : sharabhatantra, Akashabhairava tantra

Latest update : August 22

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 29, 2020

*sanskritdocuments.org*

# શ્રીશરભસહસ્રનામસ્તોત્રમ્ ૨

હરિહરવિરચિતમ્ - આકશભૈરવ તન્ત્રે

શ્રી ગણેશાય નમઃ ॥

ॐ ખેં ખાં ખં ફટ્ પ્રાણ ગ્રહાસિ
પ્રાણ ગ્રહાસિ હું ફટ્ સર્વ શત્રુ સંહારણાય શરભ સાલુવાય
પક્ષિરાજાય હુ ફટ્ સ્વાહા ॥

દ્વિચત્વારિંશદ્વર્ણઃ
ॐ અસ્ય શ્રી શરભ મન્ત્રસ્ય કાલાગ્નિ રુદ્ર ઋષિર્જગતી છન્દઃ
શ્રી શરભેશ્વરો દેવતા ઊં બીજં સ્વાહા શક્તિ ફટ્ કીલકં
શ્રી શરભેશ્વર પ્રીત્યર્થે જપે વિનિયોગઃ ।
શિરસિ કાલાગ્નિ રુદ્રાય ઋષયે નમઃ ।
મુખે જગતી છન્દસે નમઃ ॥

હૃદિ શરભેશ્વરાય દેવતાયૈ નમઃ ગુહ્યે ઊઁ બીજાય નમઃ ।
પાદયો સ્વાહા શક્તયે નમઃ ॥

સર્વાઙ્ગં હું ફટ્ કીલકાય નમઃ ॥

ઊઁ ખેં ખાં અઙ્ગુષ્ઠાભ્યાં નમઃ ॥

ખં ફટ્ તર્જનીભ્યાં સ્વાહા ॥

પ્રાણગ્રહાસિ પ્રાણગ્રહાસિ હું ફટ્ મધ્યમાભ્યાં વષટ્ ।
સર્વશત્રુ સંહારણાય અનામિકાભ્યાં હુમ્ ॥

શરભ-સાલુવાય કનિષ્ઠિકાભ્યાં વૌષટ્ ॥

પક્ષિરાજાય હું ફટ્ સ્વાહા કરતલકર પૃષ્ઠાભ્યાં ફટ્ત્ર ॥

અથ હૃદયાદિ ન્યાસ ॥

ૐ ખેં ખાં હૃદયાય નમઃ ॥ ૐ ખં ફટ્ શિરસે સ્વાહા ॥

પ્રાણગ્રહાસિ પ્રાણગ્રહાસિ હું ફટ્ શિખાયૈ વષટ્ ॥

સર્વશત્રુ સંહારણાય કવચાય હુમ્ ॥

શરભ સાલુવાય નેત્રત્રયાય વૌષટ્ ॥

પક્ષિરાજાય હું ફટ્ સ્વાહા અસ્ત્રાય ફટ્ ॥

॥ ધ્યાનમ્ ॥

ચન્દ્રાર્કૌવહ્નિદૃષ્ટિઃ કુલિશવરનખશ્ચઞ્ચંલોત્યુગ્રજિહ્વઃ ।
કાલી દુર્ગા ચ પક્ષૌ હૃદયજઠરગૌભૈરવો વાડવાગ્નિઃ ॥

ઊરુસ્થૌ વ્યાધિમૃત્યુ શરભવર ખગશ્ચણ્ડ વાતાતિવેગઃ ।
સંહર્તા સર્વશત્રૂન્ સ જયતિ શરભઃ શાલુવઃ પક્ષિરાજઃ ॥ ૧॥

વર્ણસહસ્રં જપઃ ॥ પાયસેન ઘૃતાક્તેન હોમઃ ॥

અથ સઙ્કલ્પઃ ।
ગૌરીવલ્લભ કામારે કાલકૂટવિષાદન ।
મામુદ્ધરાપદામ્માધેસ્ત્રિપુરઘ્નાન્ત કાન્તક ॥

અથ શ્રીશરભસહસ્રનામસ્તોત્રમ્ ॥

ૐ સર્વભૂતાત્મભૂતસ્ય રહસ્યમિત તેજસ ।
અષ્ટોત્તરસહસ્રં તુ નામ્નાં સર્વસ્ય મે શ◌ૃણુ ॥ ૧॥

યચ્છ્રુત્વા મનુજ વ્યાઘ્ર સર્વાન્તામાનવાપ્યસિ ।
સ્થિરઃ સ્થાણુઃ પ્રભુર્ભીમઃ પ્રભવો વરદો વરઃ ॥ ૨॥

જટી ચર્મી શિખણ્ડી ચ સર્વાઙ્ગઃ સર્વભાવનઃ ।
હરશ્ચ હરિણાક્ષશ્ચ સર્વભૂતહરઃ પ્રભુઃ ॥ ૩॥

પ્રવૃત્તિશ્ચ નિવૃત્તિશ્ચ નિયતઃ શાશ્વતો ધ્રુવઃ ।
શ્મશાનવાસી ભગવાન્ વચસોઽગોચરો ઘનઃ ॥ ૪॥

અતિવાધો મહાકર્મા તપસ્વી ભૂતભાવનઃ ।
ઉન્મત્તવૃષોથ પ્રચ્છન્નઃ સર્વલોકપ્રજાપતિઃ ॥ ૫॥

મહારૂપો મહાકાયો વૃષરૂપો મહાયશાઃ ।
મહાત્મા સર્વભૂતાત્મા વિશ્વરૂપો મહાહનુઃ ॥ ૬॥

લોકપાલોઽતર્હિતાત્મા પ્રસાદો હયગર્દભી ।
પવિત્રશ્ચ મહાંશ્ચૈવ નિયમો નિગમપ્રિય ॥ ૭॥

સર્વકર્મા સ્વયમ્ભૂશ્ચ આદિસૃષ્ટિકરો નિધિ ।
સહસ્રાક્ષો વિરૂપાક્ષઃ સોમો નક્ષત્રસાધકઃ ॥ ૮॥

સૂર્યચન્દ્રગતિઃ કેતુર્ગ્રહો ગ્રહપતિર્વરઃ ।
અદારિદ્ર્યદ્યાલય કર્તા મૃગબાણાર્પણોનઘઃ ॥ ૯॥

મહાતપા દીર્ઘતપા અદીનો દીનસાધનઃ ।
સંવત્સરકરો મન્ત્રી પ્રમાણં પરમં તપઃ ॥ ૧૦॥

યોગી યોગ્યો મહાબીજો મહારેતા મહાતપાઃ ।
સુવર્ણરેતાઃ સર્વજ્ઞઃ સુવીજો વૃષવાહનઃ ॥ ૧૧॥

દશબાહુશ્ચ નિમિષો નીલકણ્ઠ ઉમાપતિઃ ।
બહુરૂપઃ સ્વયંશ્રેષ્ઠો બલિર્વૈરોચનો ગણઃ ॥ ૧૨॥

ગણકર્ત્તા ગણપતિર્દિગ્વાસાઃ કામ એવ ચ ।
મન્ત્રવિત્પરમોમન્ત્રઃ સર્વભાવકરો હરઃ ॥ ૧૩॥

કમણ્ડલુધરો ધન્વી વાણહસ્તઃ કપાલવાન્ ।
અશિની શતઘ્ની ખણ્ડી પટ્ટિશશ્ચાયુધી મહાન્ ॥ ૧૪॥

શ્રુતિહસ્તઃ સરૂપશ્ચ તેજસ્તેજસ્કરો વિભુઃ ।
ઉશ્નીષી ચ સુવક્ત્રશ્ચ ઉદગ્રો વિનયસ્તથા ॥ ૧૫॥

દીર્ઘશ્ચ હરિનેત્રશ્ચ સુતીર્થઃ કૃષ્ણ એવ ચ ।
શ ૃગાલરૂપઃ સર્વાર્થો મુણ્ડઃ સર્વકમણ્ડલુઃ ॥ ૧૬॥

અજશ્ચ મૃગરૂપશ્ચ ગન્ધચારી કપર્દિનઃ ।
ઊર્ધ્વરેતા ઉર્ધ્વલિઙ્ગ ઉર્ધ્વશાયી નભસ્તલઃ ॥ ૧૭॥

ત્રિજટશ્ચૌરવાસી ચ રુદ્રસેનાપતિર્વિભુઃ ।
નક્તઞ્ચરોતિતિગ્મશ્ચ અહશ્ચારી સુવર્ચસઃ ॥ ૧૮॥

ગજહા દૈત્યહા ચૈવ લોકભ્રાતા ગુણાકરઃ ।
સિંહશાર્દૂલરૂપશ્ચ આર્દ્રચર્માંવરો વરઃ ॥ ૧૯॥

કાલયોગી મહાકાલઃ સર્વવાસાશ્ચતુષ્પથ ।

નિશાચર પ્રેતચારી ભૂતચારી મહેશ્વરઃ ॥ ૨૦॥

બહુરૂપો બહુધન સર્વાધારા મનોગતિઃ ।
નૃત્યપ્રિયો નૃત્યતૃપ્તો નૃત્યકઃ સર્વમાલયઃ ॥ ૨૧॥

ઘોષો મહાતપા ઈશો નિત્યો ગિરિચરો નભઃ ।
સહસ્રહસ્તો વિજયો વ્યવસાયોહ્યનિન્દિતઃ ॥ ૨૨॥

અમર્ષણો મહામર્ષી ઈ યશકામો મનોમયઃ ।
દક્ષયજ્ઞાપહારી ચ સુખદો મધ્યમસ્તથા ॥ ૨૩॥

તેજોપહારી બલહા મુદિતોપ્યજિતો ભવઃ ।
દમ્ભી દ્વેષી ગમ્ભીરો ગમ્ભીરબલવાહનઃ ॥ ૨૪॥

ન્યગ્રોધરૂપો ન્યગ્રોધો વૃક્ષકર્ત્તાસ્ગવૃદ્ધિભુઃ ।
તીક્ષ્ણવ્વાહુશ્ચ હર્ષશ્ચ સહાયઃ સર્વકાલવિત્ ॥ ૨૫॥

વિષ્ણુપ્રસાદિતો યજ્ઞઃ સમુદ્રો વડવામુખઃ ।
હુતાશન સહાયશ્ચ પ્રશાન્તાત્મા હુતાશનઃ ॥ ૨૬॥

ઉગ્રતેજા મહાતેજા જયો (જયો) વિજય કાલવિત્ ।
જ્યોતિષામયનઃ સિદ્ધિઃ સન્ધિવિગ્રહ એવ ચ ॥ ૨૭॥

શિખી દણ્ડી જટી જ્વાલી મૃત્યુજિદ્દુર્ધરો વલી ।
વૈષ્ણવી પણવીતાલી કાલઃ કાટકટઙ્કુરઃ ॥ ૨૮॥

નક્ષત્રવિગ્રહવિધિર્ગુણવૃદ્ધિલયોગમઃ ।
પ્રજાપતિ દિશા વાહુ વિભાગઃ સર્વતોમુખઃ ॥ ૨૯॥

વૈરોચનો સુરગણો હિરણ્યકવચોદ્ભવઃ ।
અપ્રજ્યો વાલચારી ચ મહાચારી સ્તુતસ્તથા ॥ ૩૦॥

સર્વતૂર્ય નિનાદી ચ સર્વનાથ પરિગ્રહઃ ।
વ્યાલરૂપો વિલાવાસી હેમમાલી તરઙ્ગવિત્ ॥ ૩૧॥

ત્રિદિશસ્ત્રિદિશાવાસી સર્વબન્ધવિમોચનઃ ।
બન્ધનસ્ત્વસુરેન્દ્રાણાં યુધિ શત્રુવિનાશનઃ ॥ ૩૨॥

સાક્ષાત્પ્રસાદો દુર્વાસા સર્વસાધુનિષેવિતઃ ।
પુસ્કન્દનો વિભાવશ્ચ અતુલ્યો યજ્ઞભાગવિત્ ॥ ૩૩॥

સર્વચારી સર્વવાસો દુર્વાસા વાઙ્મનોભવઃ ।
હેમો હેમકરો યજ્ઞઃ સર્વવીરો નરોત્તમઃ ॥ ૩૪॥

લોહિતાક્ષો મહોક્ષશ્ચ વિજયાખ્યો વિશારદઃ ।
સદ્ગ્રહો વિગ્રહો કર્મા મોક્ષઃ સર્વનિવાસનઃ ॥ ૩૫॥

મુખ્યો મુક્તશ્ચ દેહશ્ચ દેહાર્થઃ સર્વકામદઃ ।
સર્વકાલપ્રસાદશ્ચ સુવલો વલરૂપધૃક્ ॥ ૩૬॥

આકાશનિધિરૂપશ્ચ નિષાદી ઉરગઃ ખગઃ ।
રૌદ્રરૂપી પાંસુરાદીઃ વસુરશ્મિઃ સુવર્ચસી ॥ ૩૭॥

વસુવેગો મહાવેગો મહાયક્ષો નિશાકરઃ ।
સર્વભાવપ્રિયાવાસી ઉપદેશકરો હરઃ ॥ ૩૮॥

મનુરાત્મા પતિર્લોકી સમ્ભોજ્યશ્ચ સહસ્રશઃ ।
પક્ષી ચ પક્ષિરૂપી ચ અતિદીપ્તો વિશામ્પતિઃ ॥ ૩૯॥

ઉન્માદો મદનઃ કામોહ્યાસ્યોર્થકરોયશઃ ।
વામદેવશ્ચ રામશ્ચ પ્રાગ્દક્ષિણશ્ચ વામનઃ ॥ ૪૦॥

સિદ્ધયોગો મહર્ષિશ્ચ સિદ્ધાર્થઃ સિદ્ધિસાધકઃ ।
વિષ્ણુશ્ચ ભિક્ષુરૂપશ્ચ વિષધ્નો મૃદુરવ્યયઃ ॥ ૪૧॥

મહાસેનો વિશાખશ્ચ વૃષ્ટિભોગો ગવાં પતિ ।
વજહસ્તશ્ચ વિષ્કુમ્ભી ચ ભૂસ્તમ્ભન એવ ચ ॥ ૪૨॥

વૃત્તો વૃત્તકરઃ સ્થણુર્મધુમધુકરો ધનઃ ।
વાચસ્પત્યો વાજસેનો નિત્યમાશ્રમપૂજિતઃ ॥ ૪૩॥

બ્રહ્મચારી લોકચારી સર્વચારી વિચારવિત્ ।
ઈશાન ઈશ્વરઃ કાલો નિશાચારી પિનાકધૃક્ ॥ ૪૪॥

નિમિત્તજ્ઞો (સ્થો) નિમત્તશ્ચ નન્દિર્નાદકરો હરિઃ ।
નદીશ્વરશ્ચ નન્દી ચ નન્દિનો નન્દિવર્દ્ધનઃ ॥ ૪૫॥

ભગહારી નિહન્તા ચ કાલો બ્રહ્મા પિતામહઃ ।
ચતુર્મુખો મહાલિઙ્ગશ્ચતુર્લિઙ્ગસ્થૈવ ચ ॥ ૪૬॥

લિઙ્ગાધ્યક્ષઃ સુરાધ્યક્ષો યોગાધ્યક્ષો યુગાવહઃ ।
બીજાધ્યક્ષો બીજકર્ત્તા અધ્યાત્માનુગતો બલઃ ॥ ૪૭॥

ઇતિહાસઃ સકલ્પશ્ચ ગૌતમોથ નિશાકરઃ ।
દભોહ્યદભો વૈદમ્ભો વશ્યો વશ્યકરઃ કલિઃ ॥ ૪૮॥

લોકકર્તા પશુપતિર્મહાકર્તા હ્યનૌષધઃ ।
અક્ષરં પરમં બ્રહ્મ વલટાચ્છન્ન એવ ચ ॥ ૪૯॥

નીતિર્હ્યનીતિઃ શુદ્ધાત્મા શુદ્ધો માન્યો ગતાગતિઃ ।
બહુપ્રસાદ સુસ્વપ્નો દર્પણોથત્વમિત્રજિત્ ॥ ૫૦।
વેદકારો મન્ત્રકારો વિદ્વાન્સમરમર્દનઃ ।
મહામોઘનિવાસી ચ મહાઘોરો વશીકરઃ ॥ ૫૧॥

અગ્નિજ્વાલો મહાજ્વાલો અતિધૂમ્રો હુતો હવિઃ ।
વૃષલઃ શઙ્કરો નિત્યો વર્ચસી ધૂમ્રલોચનઃ ॥ ૫૨॥

નીલસ્તથાઙ્ગલુબ્ધશ્ચ શોભનો નિરવગ્રહઃ ।
સ્વસ્તિદઃ સ્વસ્તિભાવશ્ચ ભોગી ભોગકરો લઘુઃ ॥ ૫૩॥

ઉત્સઙ્ગશ્ચ મહાઙ્ગશ્ચ મહાભોગો પરાયણઃ ।
કૃષ્ણવર્ણઃ સુવર્ણશ્ચ ઇન્દ્રિયં સર્વદેહિનામ્ ॥ ૫૪॥

મહાપાદો મહાહસ્તો મહાકાયો મહાયશાઃ ।
મહામૂર્દ્ધા મહામાત્રો મહાનેત્રો નિશાલયઃ ॥ ૫૫॥

મહાન્તકો મહાકર્ણો મહોક્ષશ્ચ મહાહનુઃ ।
મહાનનો મહાકંવુર્મહાગ્રીવઃ શ્મશાનભાક્ ॥ ૫૬॥

મહાવક્ષા મહોરસ્કો હ્યન્તરામા મૃગાલયઃ ।
લમ્બિતો લમ્બિતોષ્ટશ્ચ મહામાયા પયોનિધિ ॥ ૫૭॥

મહાદન્તો મહાદંષ્ટ્રો મહાજિહ્વો મહામુખઃ ।
મહાનખો મહારોમા મહાકેશો મહાજરઃ ॥ ૫૮॥

પ્રસન્નશ્ચ પ્રસાદશ્ચ પ્રતયો યોગિસાધનઃ ।
સ્નેહનોતિશુભસ્નેહઃ અજિતશ્ચ મહામુનિઃ ॥ ૫૯॥

વૃક્ષકારો વૃક્ષકેતુઃ અનલો વાયુવાહનઃ ।
મણ્ડલી ધામશ્ચ દેવાધિપતિરેવ ચ ॥ ૬૦॥

અથર્વશીર્ષઃ સામાસ્યઃ ઋક્ સાહસ્ર મિતેક્ષણઃ ।

યજુઃ પાદભુજાગુહ્યઃ પ્રકાશો જઙ્ગમસ્તથા ॥ ૬૧॥

અમોઘાર્થપ્રસાદશ્ચ અતિગમ્યઃ સુદર્શનઃ ।
ઉપકારપ્રિયઃ સર્વઃ કનકઃ કાઞ્ચનસ્થિતઃ ॥ ૬૨॥

નાભિર્નંદિકરો ભાવઃ પુષ્કરસ્ય પતિસ્થિરઃ ।
દ્વાદશાસ્ત્રમસશ્ચાદ્યો યજ્ઞો યજ્ઞસમાહિતઃ ॥ ૬૩॥

નક્તં કલિશ્ચ કાલશ્ચ કકારઃ કાલપૂજિતઃ ।
સવાણો ગણકારશ્ચ ભૂતવાહનસારથિઃ ॥ ૬૪॥

ભસ્મશાયી ભસ્મગોપ્તા ભસ્મભૂતસ્તમોગુણઃ ।
લોકપાલસ્તથા લોકો મહાત્મા સર્વપૂજિતઃ ॥ ૬૫॥

શુક્લસ્ત્રિશુક્લસમ્પન્નઃ શુચિર્ભૂતનિષેવિતઃ ।
આશ્રમસ્થઃ ક્રિયાવસ્થો વિશ્વકર્મા મતિર્વરઃ ॥ ૬૬॥

વિશાલશાખસ્તામ્રોષ્ટોહ્યમ્બુજાલઃ સુનિશ્ચલઃ ।
કપિલઃ કપિલઃ શુક્લ આયુશ્ચૈવ પરોવરઃ ॥ ૬૭॥

ગન્ધર્વો હ્યદિતિસ્તાર્ક્ષ્યઃ સુવિજ્ઞેયઃ સુશારદઃ ।
પરશ્વધાયુધો દેવ અન્ધકારિઃ સુવાન્ધવઃ ॥ ૬૮॥

તુમ્બવીણો મહાક્રોધ ઊર્ધ્વરેતા જલેશયઃ ।
ઉગ્રો વંશકરો દ્વંશો વંશનાદોહ્યનિન્દિતઃ ॥ ૬૯॥

સર્વાઙ્ગરૂપો માયાવી સુહ્યદોહ્યનિલોનલઃ ।
બન્ધનો બન્ધકર્તા ચ સુબધુરવિમોચનઃ ॥ ૭૦॥

મેષજારિઃ સુકર્મારિર્મહાદંષ્ટ્રસમો યુધિ ।
બહુસ્વનિર્મિતઃ સર્વઃ શઙ્કરઃ શઙ્કરો વરઃ ॥ ૭૧॥

અમરેશો મહાદેવો વિશ્વદેવઃ સુરારિહા ।
નિસઙ્ગશ્ચાહિર્બુધ્ન્યશ્ચાકિતાક્ષો હરિસ્તથા ॥ ૭૨॥

અજૈકપાલપાલીચ ત્રિશઙ્કુરજિતઃ શિવઃ ।
ધન્વતરિર્ધૂમ્રકેતુઃ સ્કન્દો વૈશ્રવણસ્તથા ॥ ૭૩॥

ધાતા શક્રશ્ચ વિશ્વશ્ચ મિત્રસ્ત્વષ્ટાધ્રુવો વસુઃ ।
પ્રભાવઃ સર્વગો વાયુરર્યમાસવિતારથિઃ ॥ ૭૪॥

ઉગ્રદંષ્ટ્રો વિધાતા ચ માન્ધાતા ભૂતભાવનઃ ।
રતિસ્તીર્થશ્ચ વાગ્મી ચ સર્વકર્મગુણાવહ ॥ ૭૫॥ ।

પદ્મવક્રો મહાવક્રશ્ચન્દ્રવક્રો મનોરમઃ ।
વલયાન્યશ્ચ શાન્તશ્ચ પુરાણઃ પુણ્યવર્ચસઃ ॥ ૭૬॥

કુરુકર્તા કાલરૂપી કુરુભૂતો મહેશ્વરઃ ।
શર્વો સર્વો દર્ભશાયી સર્વેષાં પ્રાણિનાં પતિઃ ॥ ૭૭॥

દેવદેવ સુખાશક્તઃ સદસત્સંવરરત્નવિત્ ।
કૈલાસશિખિરાવાસી હિમવદ્ગિરિસંશ્રયઃ ॥ ૭૮॥

કૂલહારી કૂલકર્ત્તા બહુબીજો બહુપ્રદઃ ।
વનિજો વર્દ્ધનો દક્ષો નકુલશ્ચદનશ્છદઃ ॥ ૭૯॥

સારગ્રીવી મહાજન્તુરત્નકશ્ચ મહૌષધિઃ ।
સિદ્ધાર્થકારી સિદ્ધાર્થઃ છન્દો વ્યાકરણાનિ ચ ॥ ૮૦॥

સિંહનાદઃ સિંહદંષ્ટ્રઃ સિંહગઃ સિંહવાહનઃ ।
પ્રભાવાત્મા જરાસ્તાલોલ્લોકાહિતાન્તકઃ ॥ ૮૧॥

સારગોઽસુખવક્રાન્ત કેતુમાલી સ્વભાવતઃ ।
ભૂતાશ્રયો ભૂતપતિરહોરાત્રમનિન્દકઃ ॥ ૮૨॥

આસનઃ સર્વભૂતાનાં નિલયઃ વિભુર્ભૈરવઃ ।
અમોઘસર્વભૂષાસ્યો યાજનઃ પ્રાણહારકઃ ॥ ૮૩॥

ધૃતિમાન્ જ્ઞાતિમાન્ દક્ષઃ સત્કૃતશ્ચ યુગાધિપઃ ।
ગોપાલો ગોપતિર્ગોપ્તા ગોશ્વવસનો હરઃ ॥ ૮૪॥

હિરણ્યબાહુશ્ચ તથા ગુહયકાલઃ પ્રવેશકઃ ।
પ્રતિષ્ઠાયાં મહાહર્ષોઝ્જિતકામો જિતેન્દ્રિયઃ ॥ ૮૫॥

ગાન્ધારશ્ચ સુશીલશ્ચ તપઃ કર્મરતિર્ધનઃ ।
મહાગીતો મહાબ્રહ્માહ્મક્ષરો ગણસેવિતઃ ॥ ૮૬॥

મહાકેતુઃ કર્મધાતનૈકતાનશ્ચરાચરઃ ।
અવેદનીય આવેશઃ સર્વગન્ધસુખાવહઃ ॥ ૮૭॥

તોરણાસ્તરણો વાયુઃ પરિધાવતિ ચૈતકઃ ।
સંયોગો વર્દ્ધનો વૃદ્ધો મહાવૃદ્ધો ગણાધિપઃ ॥ ૮૮॥

નિત્યો ધર્મસહાયશ્ચ દેવાસુરપતિઃ પતિઃ ।
અમુક્તો મુસ્તબાહુશ્ચ દ્વિવિધશ્ચ સુપર્વણઃ ॥ ૮૯॥

આષાઢશ્ચ સુખાઢ્યશ્ચ ધ્રુવો હરિહયો હરિઃ ।
વસુરાવર્ત્તનો નિત્યો વસુશ્રેષ્ઠો મહામદઃ ॥ ૯૦॥

શિરોહારી ચ વર્ષી ચ સર્વલક્ષણભૂષિતઃ ।
અક્ષરશ્ચાક્ષયો યોગી સર્વયોગી મહાવલઃ ॥ ૯૧॥

સમામ્નાયોઽસમામ્નાયસ્તીર્થદેવો મહાદ્યુતિઃ ।
નિર્બીજો જીવનો મન્ત્રો અનઘો બહુકર્કશઃ ॥ ૯૨॥

રક્તપ્રભૂતો રક્તાઙ્ગો મહાર્ણવનિનાદકૃત્ ।
મૂલો વિશાખો યમૃતોક્તયક્તોવ્યઃ સનાતનઃ ॥ ૯૩॥

આરોહણો નિરંહશ્ચ શૈલહારી મહાતપાઃ ।
સેનાકલ્પો મહાકલ્પો યુગો યુગઙ્કરો હરિઃ ॥ ૯૪॥

યુગરૂપો મહારૂપો પવનો ગહનો નગઃ ।
ન્યાયનિર્વાપણો નાદઃ પણ્ડિતોહ્યચલોપમઃ ॥ ૯૫॥

બહુમાલો મહામાલઃ સુમાલો બહુલોચનઃ ।
વિસ્તારો લવણઃ કૂરઃ ઋતુમાસફલોદયઃ ॥ ૯૬॥

વૃષભો વૃષભાગાઙ્ગો મણિબન્ધુર્જટાધરઃ ।
ઇન્દ્રો વિસર્ગઃ સુમુખઃ સુરઃ સર્વાયુધઃ સહઃ ॥ ૯૭॥

નિવેશનઃ સુધન્વા ચ પૂગગન્ધો મહાહનુઃ ।
ગન્ધમાલી ચ ભગવાન્ સાનન્દઃ સર્વકર્મણામ્ ॥ ૯૮॥

માત્મનો બાહુલો બાહુઃ સકલઃ સર્વલોચનઃ ।
રુદ્રસ્તાલીકરસ્તાલી ઊર્ધ્વસંહતલોચનઃ ॥ ૯૯॥

છત્રપદ્મઃ સુવિખ્યાતઃ સર્વલોકાશ્રયો મહાન્ ।
મુણ્ડો વિરૂપો બહુલો દણ્ડી મુણ્ડો વિકુણ્ડલઃ ॥ ૧૦૦॥

હર્યક્ષઃ કકુભોક વજ્રી દીપ્તાવર્ચઃ સહસ્રપાત્ ।
સહસ્રમૂર્દ્ધા દેવેદ્રઃ સર્વભૂતમયો હરિ ॥ ૧૦૧॥

સહસ્રબાહુઃ સર્વાઙ્ગઃ શરણ્યઃ સર્વકર્મકૃત્ ।

પવિત્રઃ સ્નિગ્ધયુર્મન્ત્રઃ કનિષ્ઠઃ કૃષ્ણપિઙ્ગલઃ ॥ ૧૦૨॥

બ્રહ્મદણ્ડવિનિર્વાતઃ શરઘ્નઃ શરતાપધૃક્ ।
પદ્મગર્ભો મહાગર્ભો પદ્મગર્ભો જલોદ્ભવ ॥ ૧૦૩॥

ગભસ્તિર્બ્રહ્મકૃત્ બ્રહ્મ બ્રહ્મકૃદ્ બ્રાહ્મણો ગતિ ।
અનન્તરૂપો નૈકાત્મા તગ્મતેજાત્મસમ્ભવઃ ॥ ૧૦૪॥

ઊર્ધ્વગાત્મા પશુપતિઃ વીતુરઙ્ગા મનોજવઃ ।
વન્દની પદ્મમાલી ચ ગુણજ્ઞો સ્વગુણોત્તરઃ ॥ ૧૦૫॥

કર્ણિકારો મહાસ્રગ્વી નીલમૌલી પિનાકધૃક્ ।
ઉમાપતિરુમાકાન્તો જાહ્નવીહૃદયઙ્ગમઃ ॥ ૧૦૬॥

વીરો વરાહો વરદો વરેશશ્ચ મહામના ।
મહાપ્રભાવસ્ત્વનઘઃ શત્રુહા શ્વેતપિઙ્ગલઃ ॥ ૧૦૭॥

પ્રીતાત્મા પ્રયત્તાત્મા ચ સંયતાત્મા પ્રધાનધૃક્ ।
સર્વપાર્શ્વસ્તુતસ્તાર્ક્ષ્યો ધર્મઃ સાધારણો વરઃ ॥ ૧૦૮॥

ચરાચરાત્મા સૂક્ષ્માત્મા ગોવૃષો ગોવૃષેશ્વરઃ ।
સાધ્યર્ષિર્વસુરાદિત્યો વિવસ્વાન્ સવિતા મૃગઃ ॥ ૧૦૯॥

વ્યાસઃ સર્વસ્ય સઙ્ક્ષેપો વિસ્તારઃ પર્યયોનયઃ ।
ઋતુઃ સંવત્સરો માસઃ પક્ષઃ સઙ્ખ્યા પરાયણઃ ॥ ૧૧૦॥

કલા કાષ્ટા લયો માત્રા મુહૂર્તઃ પક્ષપાક્ષણઃ ।
વિશ્વક્ષેત્રં પ્રજાબીજં લિઙ્ગમાદ્યસ્ત્વનિન્દિતઃ ॥ ૧૧૧॥

સદ્વ્યવતમવ્યક્ત પિતા માતા પિતામહઃ ।
સ્વર્ગદ્વારં પ્રજાદ્વારં મોક્ષદ્વારં ત્રિવિષ્ટપમ્ ॥ ૧૧૨॥

નિર્વાણં જ્ઞાનદં ચૈવ બ્રહ્મલોક પરાગતિઃ ।
દેવાસુરગુરુર્દેવો દેવાસુરનમસ્કૃતઃ ॥ ૧૧૩॥

દેવાસુરમહામાત્રો દેવાસુરસમાશ્રય ।
દેવાસુરગણાધ્યક્ષો દેવાસુરગણાધિપઃ ॥ ૧૧૪॥

દેવાસુરેશ્વરો દેવો દેવાસુરમહેશ્વરઃ ।
સર્વદેવમયો ચિન્ત્યો દેવાનામાત્મસમ્ભવઃ ॥ ૧૧૫॥

ઉદ્ભિજ્જસ્ત્રિક્રમો વૈદ્યો વિરાજો વરદો વરઃ ।
ઈજ્યો હસ્તિમુખો વ્યાઘ્રી દેવસિંહો નરર્ષભઃ ॥ ૧૧૬॥

વિબુધાગ્રવરશ્રેષ્ઠઃ સર્વદેવોત્તમોત્તમઃ ।
ગુરુઃ કાન્તો નિજઃ સર્વઃ પવિત્રઃ સર્વવાહનઃ ॥ ૧૧૭॥

પ્રયુક્તઃ શોભનો વજ ઈશાનઃ પ્રભુરવ્યયઃ ।
ભૃગી ભૃઙ્ગપ્રિયો બભ્રૂ રાજરાજો નિરામયઃ ॥ ૧૧૮॥

અવિરામઃ સુશરણો વિરામઃ સર્વસાધનઃ ।
લલાટાક્ષો વિશ્વદેહો હારિણો બ્રહ્મવર્ચસી ॥ ૧૧૯॥

સ્થાવરાણાં પતિશ્ચૈવ નિયમેન્દ્રિયવર્દ્ધનઃ ।
સિદ્ધાર્થઃ સર્વસિદ્ધાર્થોનિત્યઃ સત્યવ્રતઃ શુચિઃ ॥ ૧૨૦॥

વ્રતાદિર્યત્પરં બ્રહ્મ મુક્તાનાં પરમાગતિઃ ।
વિમુક્તો દીર્ઘતેજાશ્ચ શ્રીમાન્ શ્રીવર્દ્ધનો જગત્ ॥ ૧૨૧॥

યથા પ્રસાદો ભગવાનિતિ ભક્ત્યા સ્તુતો મયા ।
યન્ન બ્રહ્માદયો દેવા વિદુર્યન્ન મહર્ષયઃ ॥ ૧૨૨॥

તંસ્તવીમ્યહમાદ્યં ચ કસ્તોષ્યતિ જગત્પ્રભુમ્ ।
ભક્તિશ્ચૈવ પુરસ્કૃત્ય મયા યજ્ઞાપતિર્વસુઃ ॥ ૧૨૩॥

તતોઽનુજ્ઞાપયામાસસ્તુતો મતિમતાં ગતિઃ ।
શિવ એવં સ્તુતો દેવૈઃ નામભિઃ પુષ્ટિવર્દ્ધનૈઃ ॥ ૧૨૪॥

નિત્યયુક્તઃ શુચિર્ભૂત્વા પ્રાપ્ન્યોત્યાત્માનમાત્મનઃ ।
એતદ્ધિપરમં બ્રહ્મા સ્વયઙ્ગીતં સ્વયમ્ભુવા ॥ ૧૨૫॥

ઋષયશ્ચૈવ દેવાશ્ચ સ્તુવન્ત્યેતે નુ તત્પરમ્ ।
સ્તૂયમાનો મહાદેવઃ પ્રીયતે ચાત્મનાપતિઃ ॥ ૧૨૬॥

ભક્તાનુકમ્પી ભગવાનાત્મસંસ્થાન્ કરોતિ તાન્ ।
તથૈવ ચ મનુષ્યેષુ યત્ર કુત્ર પ્રધાનતઃ ॥ ૧૨૭॥

આસ્તિકઃ શ્રદ્દધાનશ્ચ બહુભિર્જન્મભિઃ સ્તવૈઃ ।
જાગ્રતોથ સ્વપતશ્ચ વ્રજન્તો ગતિસંસ્થિતાઃ ॥ ૧૨૮॥

સ્તુવન્તિ સ્તૂયમાને ચ ચતુષ્પથિ રમન્તિ ચ ।
જન્મકોટિસહસ્રેષુ નાનાસંસારયોનિષુ ॥ ૧૨૯॥

જન્તોર્વિશુદ્ધપાપસ્ય ભવે ભક્તિઃ પ્રજાયતે ।
ઉત્પન્ના ચ ભવે ભક્તિરનન્યા સર્વભાવતઃ ॥ ૧૩૦॥

એતદ્દેવેષુ દુઃપ્રાપો માનુષેષુ ન લભ્યતે ।
નિર્વિઘ્ના નિશ્ચલા ભદ્રે ભક્તિરવ્યભિચારિણી ॥ ૧૩૧॥

તસ્યૈવ ચ પ્રસાદેન ભક્તિરુત્પદ્યતે નૃપ ।
યયા યાતિ પરાં સિદ્ધિં તદ્ભાગવતમાનસઃ ॥ ૧૩૨॥

યે સર્વભાવોપહતાઃ પરત્વેનાનુભાવિતાઃ ।
પ્રપન્નવત્સલા દેવઃ સંસારાત્તાન્ સમુદ્ધરેત્ ॥ ૧૩૩॥

એવમન્યેપિ કુર્વન્તિ દેવાઃ સંસારમોચનમ્ ।
મનુષ્યાણાં મહાદેવાદન્યત્રાપિ તપોબલાત્ ॥ ૧૩૪॥

ઇતિ તેનેદં કલ્યાયાય ભગવાન્ સદસત્ પતિઃ ।
કૃત્તિવાસા ધ્રુવં પૂર્વં તાડિતા શુદ્ધબુદ્ધયઃ ॥ ૧૩૫॥

સ્તવમેનં ભગવતિ બ્રહ્મો સ્વયમધારયત્ ।
બ્રહ્મા પ્રોવાચ શક્રાય શક્રઃ પ્રોવાચ મૃત્યવે ॥ ૧૩૬॥

મૃત્યુઃ પ્રોવાચ રુદ્રેભ્યો રુદ્રેભ્યસ્તણ્ડિમાગયત્ ।
મહતા તપસા પ્રાપ્તસ્તણ્ડિના બ્રહ્મ સમ્મતિઃ ॥ ૧૩૭॥

સ્તણ્ડીઃ પ્રોવાચ શુક્રાય ગૌતમાયાહ ભાર્ગવઃ ।
વૈવસ્વતાય ભગવાન્ ગૌતમઃ પ્રાહ સાધવે ॥ ૧૩૮॥

નારાયણાય સાધ્યાય મનુરિષ્ટાય ધીમતે ।
યમાય પ્રાહ ભગવાન્ સાધ્યો નારાયણોવ્યયઃ ॥ ૧૩૯॥

નાચિકેતાય ભગવાનાહ વૈવસ્વતો યમઃ ।
માર્કણ્ડેયાય વાર્ષ્ણેય નાચિકેતાભ્યભાષત ॥ ૧૪૦॥

તથાપ્યહમમિત્રઘ્નસ્તાવન્દ્દાદ્ય વિશ્રુતમ્ ।
સ્વર્ગ્યમારોગયમાયુષ્યં ધન્યં વેદૈશ્ચ સમ્મિતમ્ ॥ ૧૪૧॥

નાસ્ય વિઘ્નાનિ કુર્વન્તિ દાનવા યક્ષરાક્ષસાઃ ।
પિશાચા યાતુધાન્તાશ્ચ ગુહ્યકા ભુજગા અપિ ॥ ૧૪૨॥

ય પઠેત્પ્રયતઃ પ્રાતર્બ્રહ્મચારી જિતેન્દ્રિય ।

અભિન્નયોગો વર્ષન્તુ અશ્વમેધફલં લભેત્ ॥ ૧૪૩॥

ઇયાકાશ ભૈરવતન્ત્રે હરિહરબ્રહ્મવિરચિતે ।
શરભસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥ ૧૪૪॥

॥ ઇતિ આકાશભૈરવતન્ત્રે હરિહરવિરચિતમ્
શ્રીશરભસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by DPD, Pallasena Narayanaswami ppnswami at gmail.com

*Sharabhasahasranamastotram 2*

pdf was typeset on August 29, 2020

Please send corrections to *sanskrit@cheerful.com*